जात्य: १० । इति हेमचन्द्र: । ३ । १६६ ॥
महाकुल: ११ कौलेय: १२ कौलेयक: १३ ।
इत्यमरटीका ॥ कुलज: १४ साधुज: १५ कुल-
श्रेष्ठ: १६ । इति शब्दरत्नावली ॥ (यथा, वृहत्-
संहितायाम् । १७ । ४ ।
"भेदे वृद्धिविनाशौ भेद: सुहृदां महाकुला-
नाञ्च ॥"
क्ली, उत्तमं कुलम् । यथा, राजतरङ्गिण्याम् ।
३ । ६१ ।
"द्वयोरालोकितं चित्रं जन्मैकस्मिन् महा-
कुले ॥")
महाकुलीन:, त्रि, (महाकुलस्य अपत्यम् । महा-
कुल + "महाकुलादञ्खञौ ।" ४ । १ । १४१ ।
इति पक्षे ख: । ) महाकुल: । यथा,—
"महाकुलीन ऐक्ष्वाके वंशे दाशरथिर्मम ।
पितु: प्रियङ्करो भर्त्ता चेमकारस्तपस्विनाम् ॥"
इति भट्टि: । ५ । ७७ श्लोक: ॥
(स्त्रियां टाप् । यथा, रामायणे ।२।२९।३।
"सीते ! महाकुलीनासि धर्म्मे च निरता
सदा ॥")
महाकुष्ठं, क्ली, ( महच्च तत् कुष्ठञ्चेति । ) वृहत्-
कुष्ठरोग: । तत् सप्तविधं यथा,—
"पूर्व्वत्रिकं तथा सिध्मं तत: काकणकं तथा ।
पुण्डरीकर्च्चजिह्वे तु महाकुष्ठानि सप्त च ॥
पूर्व्वत्रिकं कपालौदुम्बरमण्डलाख्यम् । सिध्म-
शब्दोऽकारान्तो नपुंसकलिङ्ग: । ननु कथं
सिध्मस्य महाकुष्ठेषु गणना सुश्रुतेन क्षुद्र-
कुष्ठेषूक्तत्वात् । उच्यते । त्वङ्मात्रगता सिध्म-
पुष्पिका सुश्रुतेन च क्षुद्रकुष्ठेषूक्ता धातुषु प्रवि-
ष्टन्तु सिध्मं महाकुष्ठमेव । एवंविधस्य सिध्मस्य
चरकेण महाकुष्ठेषु दर्शितत्वात् । एषां
महाकुष्ठत्वञ्च शीघ्रमुत्तरोत्तरधात्ववगाहनात्
उत्पन्नदोषजन्यत्वात् चिकित्साबाहुल्याच्च ।"
इति भावप्रकाश: ॥ ( एषां चिकित्सा क्षुद्रकुष्ठ-
शब्दे द्रष्टव्या ॥)
महाकूप:, पुं, (महांश्चासौ कूपश्चेति ।) वृहत्कूप: ।
तत्पर्य्याय: । अन्धु: २ । इति जटाधर: ॥
महाकूल:, पुं, ( महत् कूलमस्य । ) महाकुल: ।
सत्कुल: । इति द्विरूपकोष: ।
महाकोशफला, स्त्री, ( महान् कोश: फले
यस्या: ।) देवदाली लता । इति राजनिर्घण्ट: ॥
महाकोशातकी, स्त्री, ( महती चासौ कोशा-
तकी चेति । ) हस्तिघोषा । इति राज-
निर्घण्ट: ॥ ( अस्या: पर्य्यायो यथा,—
"महाकोशातकी प्रोक्ता हस्तिघोषा महा-
फला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृत: ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )
महागद:, पुं, ( महांश्चासौ गदश्चेति । ) ज्वर: ।
इति राजनिर्घण्ट: ॥ (महारोग: । यथा, सुश्रुते ।
१ । ३३ अध्याये ।
"वातव्याधि: प्रमेहश्च कुष्ठमर्शो भगन्दर: ।
अश्मरी मूढगर्भश्च तथैवोदरमष्टमम् ।
अष्टावेते प्रकृत्यैव दुश्चिकित्स्या महागदा: ॥"
औषधविशेष: । यथा, सुश्रुते कल्पस्थाने ५
अध्याये ।
"एषोऽगदो हन्ति विषं प्रयुक्त:
पानाञ्जनाभ्यञ्जननस्ययोगै: ।
अवार्य्यवीर्य्यो विषवेगहन्ता
महागदो नाम महाप्रभाव: ॥"
महती गदास्येतिविग्रहे महागदाविशिष्टे, त्रि ।
यथा, श्रीमद्भागवते । ३ । १८ । ६ ।
"परानुषक्तं तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम् ।
मर्म्माण्यभीक्ष्णं प्रतुदन्तं दुरुक्तै:
प्रचण्डमन्यु: प्रहसंस्तं बभाषे ॥")
महागन्धं, क्ली, ( महान् गन्धोऽस्य । ) हरि-
चन्दनम् । बोलम् । इति राजनिर्घण्ट: ॥ (महा-
गन्धयुक्ते, त्रि । यथा, हरिवंशे । १६३ । ४४ ।
"तत्र कण्ठे समासज्य महागन्धं नराधिप ! ।
व्याययावस्थको यत्र दुरात्मा बलदर्पित: ॥")
महागन्ध:, पुं, (महान् गन्धोऽस्य ।) कुटजवृक्ष: ।
इति राजनिर्घण्ट: ॥ जलवेतस: । इति शब्द-
चन्द्रिका ॥
महागन्धा, स्त्री, ( महान् गन्धो यस्या: । स्त्रियां
टाप् । ) नागबला । केविकापुष्पम् । इति राज-
निर्घण्ट: ॥ चामुण्डा । यथा, हेमचन्द्र: ।२।१२०।
"चामुण्डा चर्च्चिका चर्म्ममुण्डा मार्ज्जार-
कर्णिका ।
कर्णमोटी महागन्धा भैरवी च कपालिनी ॥"
महागव:, पुं, ( महांश्चासौ गौश्चेति । "गोर-
तद्धितलुकि ।" ५।४।९२ । इति समासान्तष्टच् ।
गोसदृशत्वादस्य तथात्वम् ।) गवय: । यथा,—
"वनगौर्गवय: प्रोक्तो बलभद्रो महागव: ॥"
इति राजनिर्घण्ट: ॥
महागिरि:, पुं, (महान् गिरिस्तदाख्योपाधिर्यस्य ।
यद्वा, महान् गिरिरिव ।) बौद्धभेद: । यथा—
"महागिरि: सुहस्त्याद्या वज्रान्ता दश-
पूर्व्विण: ॥"
इति हेमचन्द्र: । १ । ३४ ॥
महान् गिरि: पर्व्वत: ।) वृहत्पर्व्वतश्च ॥ (यथा,
महाभारते । ३ । ११० । १५ ।
"नातप्ततपसा शक्यो द्रष्टुमेष महागिरि: ।
आरोढुं वापि कौन्तेय ! तस्मान्नियतवाग्भव ॥"
दानवविशेष: । यथा, हरिवंशे । ३ । ८६ ।
"स्वर्भानुश्च निचन्द्रश्च उर्णनाभो महागिरि: ॥")
महागुरु:, पुं, ( महांश्चासौ गुरुश्चेति । ) अति-
गुरु: । स च पुरुषस्य पिता माता आचार्य्यश्च ।
स्त्रिया: पति: । अदत्तकन्याया: पिता माता
च । यथा । त्रय: पुरुषस्यातिगुरवो भवन्ति
माता पिताचार्य्यश्चेति । इति विष्णुसूत्रम् ॥
पत्युर्महागुरुत्वमाह रामायणे ।
"नातो विशिष्टं पश्यामि बान्धवं वै कुलस्त्रिया: ।
पतिर्ब्बन्धुर्गतिर्भर्त्ता दैवतं गुरुरेव च ॥"
शातातप: ।
"गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरु: ।
पतिरेको गुरु: स्त्रीणां सर्व्वत्राभ्यागतो गुरु: ॥"
एकपदेन दत्तस्त्रीणां पितृमातृव्यावृत्ति: ॥ * ॥
सपिण्डमरणं प्रकृत्य आश्वलायन: । त्रिरात्र-
मक्षारलवणाशिन: स्युर्द्वादशरात्रं महा-
गुरुषु । आचार्य्यश्च उपनीय ददद्वेदमाचार्य्य:
स उदाहृत: । इति याज्ञवल्क्योक्त: । तस्म-
एषे त्रिरात्राशौचित्वेन नैतादृङ्नियम: ॥
आश्वलायन: । नैतस्यां रात्रावन्नं पचेयु: ।
अन्नं न पचेयुरित्यनेनोपवास: सूचित: । अव-
सन्तरे चाहमनन्नन्त आसीरन् इति वच-
मात्रवचनात् । अधस्स्वार: कटादि: । अक्षार
लवणं क्षारस्तिलकादिक्षललवणभिन्नं तत्तु
सैन्धवं सामुद्रं च । इति शुद्धितत्त्वम् ॥ * ॥
महागुरुमरणे संवत्सरपर्य्यन्तं निषिद्धकर्म्माणि
यथा, कर्म्मलोचने ।
"महागुरुनिपाते च काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मचर्य्यञ्च यावत् पूर्णो न वत्सर: ॥
अन्यश्राद्धं परान्नञ्च गन्धं माल्यञ्च मैथुनम् ।
वर्ज्जयेद्गुरुपाते च यावत् पूर्णो न वत्सर: ॥
तीर्थयात्रां विवाहञ्चाध्यापनं तर्पणन्तथा ।
संवत्सरं न कुर्व्वीत महागुरुनिपातने ॥"
अपि च ।
"विशेषत: शिवापूजां प्रमृतपितृको द्विज: ।
यावद्वत्सरपर्य्यन्तं मनसापि न चाचरेत् ।
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मयज्ञञ्च श्राद्धं देवयुतञ्च यत् ॥"
इति कालिकापुराणे ५४ अध्याय: ॥
महागुल्मा, स्त्री, (महान् गुल्मो यस्या: ।) सोम-
वल्ली । इति राजनिर्घण्ट: ॥
महागुहा, स्त्री, ( महती गुहा यस्या: । ) पृश्नि-
पर्णी । इति राजनिर्घण्ट: ॥
महागोधूम:, पुं, ( महांश्चासौ गोधूमश्चेति । )
वृहद्गोधूम: । बड़ गम इति भाषा ॥ यथा,—
"गोधूम: सुमनोऽपि स्यात्त्रिविध: स च
कीर्त्तित: ।
महागोधूम इत्याख्य: पश्चाद्देशात् स
आगत: ॥
मधूली तु तत: किञ्चिदल्पा सा मध्यदेशजा ।
नि:शूको दीर्घगोधूम: क्वचिन्नन्दीमुखाभिध: ॥
गोधूमो मधुर: शीतो वातपित्तहरो गुरु: ।
कफशुक्रप्रदो बल्य: स्निग्ध: सन्धानकृत्सर: ॥
जीवनो वृंहणो वर्ण्यो व्रण्यो रुच्य: स्थिरत्व-
कृत् ॥"
कफप्रदो नवीनो नतु पुराण: । पुराणय-
गोधूमचणकादिलाङ्गलमूलान्युगिति वाग्भटेन
वसन्ते गृहीतत्वात् ।
"मधुली शीतला स्निग्धा पित्तघ्नी मधुरा
लघु: ।
शुक्रला वृंहणी पथ्या तद्वन्नन्दीमुखा स्मृता ॥"
इति भावप्रकाश: ॥